अधिके शत्रुजयिनी तथार्थजा दैवतैर्दृढा: ।
ध्वजपरिमाणार्थं सपरिधिः प्रथमं पिटम् ॥
षोड़शांशविहीनानि कुर्य्याच्छेषाणि बुद्धिमान् ।
रसनां विचित्रवर्णां प्रथमां दद्यात् स्वयम्भूः ॥
सुरक्तां चतुरस्राञ्च विश्वकर्म्मा द्वितीयतः ।
अष्टास्रान्तु स्वयं शक्रो नीलरक्तां प्रदापयेत् ॥
कृष्णां यमेन वृत्तञ्च वरुणेन सहस्रिकम् ।
मञ्जिष्ठाजलदाकारं वासुदेवो मस्तरकम् ॥
नीलवर्णञ्च तं दद्यात् स्कन्दो बहुविचित्रितम् ।
वृत्तन्तु दहनो दद्यात् सुवर्णाभं तथाष्टमम् ॥
वैदूर्य्यसदृशमिन्द्रो ग्रैवेयं दापयेद् बुधः ।
चक्राङ्काकृतिन्तु सूर्य्यो विश्वेदेवाः पद्मनिभम् ॥
ऋषयो नियमं दद्युर्नीलं नीलोत्पलाभासम् ।
गुरुणा शुक्रेण ततो विशालं मूर्द्धतो न्यस्तम् ॥
ग्रहैर्विचित्राणि बहुभाण्डभिः स्वानि रूपाणि ।
यद्येकेनैव दत्तन्तु केतोस्तात्तस्य भूषणम् ॥
तदैव तं विजानीयाद्यन्त्रादिभिस्तमुच्छ्रयेत् ।
प्रथमं प्रविशमाना भूमिं यष्टिर्हन्ति राष्ट्रम् ॥
बालानां तालशब्देन देशविघातं समाचष्टे ।
नृपवधकरा विशीर्णा शुभावहः स्वान्द्रा च ॥
शम्भुस्तूर्य्ययमशक्रसोमधनदवारुणैः ।
वह्नीशऋषिमन्त्राश्च होतव्या दधि चाक्षताः ॥
शुक्रस्कन्दगुरुरुद्रअश्वरादि प्रपाठयेत् ।
हुत्वा तु विधिवद्वह्निज्वालां लक्षेत बुद्धिमान् ॥
सुतेजाः सुमनो दीप्तः संहतो रुचिरप्रभः ।
रक्ताशोकसमाकारो रथभेरीस्वनः शुभः ॥
शङ्खदुन्दुभिमेघानां नादाः शस्तास्तु पावके ।
ततः सकदलीक्षुदण्डान् पताकानि समुच्छ्रये ॥
अन्याश्च विविधाः शोभाः शक्रकेतुसमुच्छ्रये ।
प्रौष्ठपदे तु अष्टम्यां शुक्लायां शोभने ऋक्षे ॥
आश्विने वाथ शुक्लायां श्रवणेनाथ उच्छ्रयेत् ।
पौरजनलक्षवृन्दैः पटभेरीनिनादितम् ॥
वितानध्वजशोभाढ्यं पताकाभिः समुज्ज्वलम् ।
विप्रौघशक्रमन्त्रेण सिंहरवाहतेन च ॥
दृढ़मातृकरन्ध्रस्थं शुभतोरणमाकुलम् ।
अविलम्बितसुत्थानमभग्नपिटकं समम् ॥
न हुतं वा समुत्थाप्य केतुं वासवजं विभो ।
उच्छ्रितं रक्षयेत्यात्रः काकोलूककपोतयोः ॥
न समुत्थापनं दद्यादन्येषामपि पक्षिणाम् ।
यन्त्रोद्देशेन ं कुर्य्यात् सुखं केतोर्यथाविधि ॥
तथा सुसंस्थितं पूज्यं सुखयन्त्रसुयन्त्रितम् ।
रात्रौ जागरणं कुर्य्यादिन्द्रमन्त्रानुकीर्त्तनम् ॥
पुरोहितः सदैवात्र शुभशान्तिरतः सदा ।
छत्रपातो नृपं हन्यात् पताका महिषीवधम् ॥
पिटके युवराजस्य सचिवमनुकम्पते ।
राष्ट्रं तोरणपातेन ध्वजे अग्निभयो भवेत् ॥
पतिते शक्रदण्डे तु नृपमन्यं समादिशेत् ।
कृमिजालक उत्थाने शलभात्तस्कराद्भयम् ।
सुसमे संस्थिते शान्तिर्नृपस्य नगरस्य च ।
याचोच्छ्रितन्तु तिष्ठन्ति तावत् पौराः सदा हृष्टाः ।
केतोर्निरता यजने शुक्लीयाद्विप्रकन्याश्च ॥
पाते तु तथैव कुर्य्यादुत्थाने याद्दशी पूजा ।
रात्रौ शुभकृत् पातनं नो दृष्टं काककपोतैः ॥
याति नृपं सहराष्ट्रं यत्रैव कारयेत् केतुम् ।
नगरे वा पुरे खेटे यद्येवं कुर्व्वते पौराः ॥
पुरे नगरस्य द्वारे वृषसिंहखगोत्थितम् ।
केतु समस्तघोराणां नाशनं जयदं महत् ॥
एवं पूर्व्वं हरिः केतुं प्राप्तवान् वृषवाहनात् ।
तथा ब्रह्मसुतेनैव ब्रह्मणः शक्रमागतः ॥
तेन सोमस्य तद्वृत्तं ततो दक्षे समागतम् ।
तदाप्रभृति कुर्व्वन्ति नृपा अद्यापि उच्छ्रयम् ॥
एवं यः कारयेद्राजा केतुं विजयकारकम् ।
तस्य पृथ्वी बलोपेता सद्वीपा वशगा भवेत् ॥”
इत्याद्ये देवीपुराणे इन्द्रध्वजलक्षणम् २१ अध्यायः ॥

शक्रनन्दनः, पुं, (शक्रस्य नन्दनः ।) अर्ज्जुनः । इति जटाधरः ॥ (इन्द्रपुत्त्रमात्रमपि ॥ शक्रं नन्दयतीति । नन्दि + ल्युः ।) इन्द्रानन्दकारके, त्रि ॥

शक्रपर्य्यायः, पुं, (शक्रस्य पर्य्यायो नाम यस्य ।) कुटजवृक्षः । इति रत्नमाला ॥ इन्द्रवाचकश्च ॥

शक्रपादपः, पुं, (शक्रस्य पादपः ।) देवदारुवृक्षः । इत्यमरः ॥ कुटजवृक्षः । इति राजनिर्घण्टः ॥

शक्रपुष्पिका, स्त्री, (शक्रपुष्पी + स्वार्थे कन् । अत इत्वम् ।) अग्निशिखावृक्षः । इति रत्नमाला ॥

शक्रपुष्पी, स्त्री, अग्निशिखावृक्षः । इत्यमरः ॥

शक्रबीजं, क्ली, इन्द्रयवः । इति राजनिर्घण्टः ॥

शक्रभवनं, क्ली, (शक्रस्य भवनम् ।) स्वर्गः । इति त्रिकाण्डशेषः ॥

शक्रभित्, [द्] पुं. (शक्रं भिनत्तीति । भिद् + क्विप् ।) इन्द्रजित् । स च रावणपुत्त्रः । इति शब्दरत्नावली ॥

शक्रभूभवा, स्त्री, इन्द्रवारुणी । इति शब्दचन्द्रिका ॥

शक्रमाता, स्त्री, (शक्रस्य मातेव ।) भार्गी । इति राजनिर्घण्टः ॥ इन्द्रजननी च ॥

शक्रमातृका, स्त्री, (शक्रस्य मातृकेव ।) शक्रध्वजाङ्गयष्टिविशेषः । यथा, कालिकापुराणम् ।
“कुमार्य्यः पञ्च कर्त्तव्याः शक्रस्य नृपसत्तम ।
शालमय्यस्तु ताः सर्व्वास्तपराः शक्रमातृकाः ॥
केतोः पादप्रमाणेन कार्य्याः शक्रकुमारिकाः ।
मातृकार्द्धप्रमाणा तु यन्त्रं हस्तद्वयं तथा ॥
एवं कृत्वा कुमारीश्च मातृकां केतुमेव च ।
एकादश्यां सिते पक्षे यष्टीनामधिवासनम् ॥”
इति तिथ्यादितत्त्वम् ॥

शक्रमूर्द्धा, [न्] स्त्री, (शक्रस्येव मूर्द्धा यस्य ।) वल्मीकः । इति त्रिकाण्डशेषः ॥

शक्रवल्ली, स्त्री, (शक्रप्रिया वल्ली ।) इन्द्रवारुणी । इति राजनिर्घण्टः ॥

शक्रवाहनः, पुं, (शक्रं वाहयतीति । वह + णिच् + ल्युः ।) मेघः । इति शब्दचन्द्रिका ॥

शक्रशरासनं, क्ली, (शक्रस्य शरासनम् ।) इन्द्रधनुः । इति हलायुधः ॥

शक्रशाखी, [न्] पुं, (शक्रनामकः शाखी ।) कुटजवृक्षः । इति भावप्रकाशः ॥

शक्रशाला, स्त्री, प्रतिश्रयः । इति भूरिप्रयोगः ॥ पुस्तकान्तरे सत्रशाला इति पाठश्च ॥ (शक्रस्य शाला ।) इन्द्रगृहञ्च ॥

शक्रशिरः, [स्] क्ली, (शक्रस्य शिर इव ।) वल्मीकः । इति राजनिर्घण्टः ॥ इन्द्रमस्तकञ्च ॥

शक्रसारथिः, पुं, (शक्रस्य सारथिः ।) मातलिः । इति हलायुधः ॥

शक्रसुतः, पुं. (शक्रस्य सुतः ।) वालिवानरः । इति हलायुधः ॥ इन्द्रपुत्त्रमात्रञ्च ॥

शक्रसुधा, स्त्री, (शक्रस्य सुधेव ।) पालङ्की । इति शब्दचन्द्रिका ॥ कुन्दुरुखोटी इति भाषा ॥

शक्रसृष्टा, स्त्री. (शक्रेण सृष्टा ।) हरीतकी । इति त्रिकाण्डशेषः ॥

शक्राख्यः, पुं, (शक्रस्य आख्या यस्य ।) पेचकः । इति त्रिकाण्डशेषः ॥ इन्द्रनामके, त्रि ॥

शक्राणी, स्त्री, (शक्रस्य पत्नी । ङीष् । आनुक् ।) शची । इति शब्दमाला ॥ (यथा, महाभारते । ५ । ११ । २२ ।
“हृष्टस्ततिरथोवाच शक्राणीं भयमोहिताम् ॥”)

शक्राशनं, क्ली, (शक्रेण अश्यते इति । अश + ल्युट् ।) भङ्गा । भाङ् इति भाषा । अस्य गुणाः ।
“शक्राशनन्तु तीक्ष्णोष्णं मोहकृत् कुष्ठनाशनम् ।
बलमेधाग्निकृत् श्लेष्मदोषहारि रसायनम् ॥”
इति राजवल्लभः ॥
अन्यत् विजयाशब्दे द्रष्टव्यम् । इन्द्रभोजनञ्च ॥

शक्राशनः, पुं, (शक्र इति नाम अश्नुते व्याप्नोतीति । अश + ल्युः ।) कुटजवृक्षः । इति शब्दचन्द्रिका ॥

शक्राह्वः, पुं, (शक्रस्य आह्वा यस्य ।) इन्द्रयवः । इति राजनिर्घण्टः ॥ इन्द्रनामके, त्रि ॥

शक्रिः, पुं, (शक + बाहुलकात् क्रिन् ।) मेघः । वज्रम् । हस्ती । पर्व्वतः । इति संक्षिप्तसारोणादिवृत्तिः ॥

शक्रोत्थानं, क्ली, (शक्रस्य शक्रध्वजस्य उत्थानम् ।) शक्रध्वजोत्सवः । अस्य विधिर्लिख्यते ।
श्रीऔर्व्व उवाच ;
“अथातः शृणु राजेन्द्र शक्रोत्थानध्वजोत्सवम् ।
यत्कृत्वा नृपतिर्याति नो कदाचित् पराभवम् ॥
रवौ हरिस्थे द्वादश्यां श्रवणे सितपक्षके ।
आराधयेन्नृपः सम्यक् सर्व्वविघ्नोपशान्तये ॥
राजोपरिचरो नाम वसूनामापरस्तु यः ।
नृपस्तेनायमतुलो यज्ञः प्रावर्त्तितः पुरा ॥
प्राविट्काले च नभसि द्वादश्यामसितेतरे ।
पुरोहितो बहुविधैर्वाद्यैस्तूर्य्यैः समन्वितः ॥
प्रथमं शक्रकेत्वर्थं वृक्षमामन्त्र्य वर्द्धयेत् ।
सांवत्सरो वार्द्धकिश्च कृतकौतुकमङ्गलः ॥
उद्याने देवतागारे श्मशाने मार्गमध्यतः ।
ये जातास्तरवस्तांस्तु वर्जयेद्वासवध्वजे ॥
बहुवल्लीयुतं शुष्कं बहुकण्टकसंयुतम् ।